✧˖°*❋ ❋*°˖✧

# ગણેશ અષ્ટકમ્

# Ganesh Ashtakam

in Gujarati

✧˖°*❋ ❋*°˖✧

# ગણેશ અષ્ટકમ્

સર્વે ઉચુઃ ।
યતોઽનંતશક્તેરનંતાશ્ચ જીવા
યતો નિર્ગુણાદપ્રમેયા ગુણાસ્તે ।
યતો ભાતિ સર્વં ત્રિધા ભેદભિન્નં
સદા તં ગણેશં નમામો ભજામઃ ॥ 1 ॥

યતશ્ચાવિરાસીજ્જગત્સર્વમેત-
-ત્તથાબ્જાસનો વિશ્વગો વિશ્વગોપ્તા ।
તથેંદ્રાદયો દેવસંઘા મનુષ્યાઃ
સદા તં ગણેશં નમામો ભજામઃ ॥ 2 ॥

યતો વહ્નિભાનૂ ભવો ભૂર્જલં ચ
યતઃ સાગરાશ્ચંદ્રમા વ્યોમ વાયુઃ ।
યતઃ સ્થાવરા જંગમા વૃક્ષસંઘાઃ
સદા તં ગણેશં નમામો ભજામઃ ॥ 3 ॥

યતો દાનવાઃ કિન્નરા યક્ષસંઘા
યતશ્ચારણા વારણાઃ શ્વાપદાશ્ચ ।
યતઃ પક્ષિકીટા યતો વીરુધશ્ચ
સદા તં ગણેશં નમામો ભજામઃ ॥ 4 ॥

યતો બુદ્ધિરજ્ઞાનનાશો મુમુક્ષો-
-ર્યતઃ સંપદો ભક્તસંતોષદાઃ સ્યુઃ ।
યતો વિઘ્નનાશો યતઃ કાર્યસિદ્ધિઃ
સદા તં ગણેશં નમામો ભજામઃ ॥ 5 ॥

યતઃ પુત્રસંપદ્યતો વાંછિતાર્થો
યતોઽભક્તવિઘ્નાસ્તથાઽનેકરૂપાઃ ।
યતઃ શોકમોહૌ યતઃ કામ એવ
સદા તં ગણેશં નમામો ભજામઃ ॥ 6 ॥

યતોऽનંતશક્તિઃ સ શેષો બભૂવ
ધરાધારણેऽનેકરૂપે ચ શક્તઃ ।
યતોऽનેકધા સ્વર્ગલોકા હિ નાના
સદા તં ગણેશં નમામો ભજામઃ ॥ 7 ॥

યતો વેદવાચો વિકુંઠા મનોભિઃ
સદા નેતિ નેતીતિ યત્તા ગૃણંતિ ।
પરબ્રહ્મરૂપં ચિદાનંદભૂતં
સદા તં ગણેશં નમામો ભજામઃ ॥ 8 ॥

શ્રીગણેશ ઉવાચ ।
પુનરૂચે ગણાધીશઃ સ્તોત્રમેતત્પઠેન્નરઃ ।
ત્રિસંધ્યં ત્રિદિનં તસ્ય સર્વકાર્યં ભવિષ્યતિ ॥ 9 ॥

યો જપેદષ્ટદિવસં શ્લોકાષ્ટકમિદં શુભમ્ ।
અષ્ટવારં ચતુર્થ્યાં તુ સોऽષ્ટસિદ્ધીરવાપ્નુયાત્ ॥ 10 ॥

યઃ પઠેન્માસમાત્રં તુ દશવારં દિને દિને ।
સ મોચયેદ્બંધગતં રાજવધ્યં ન સંશયઃ ॥ 11 ॥

વિધાકામો લભેદ્વિધાં પુત્રાર્થી પુત્રમાપ્નુયાત્ ।
વાંછિતાઁલ્લભતે સર્વાનેકવિંશતિવારતઃ ॥ 12 ॥

યો જપેત્પરયા ભક્ત્યા ગજાનનપરો નરઃ ।
એવમુક્ત્વા તતો દેવશ્ચાંતર્ધાનં ગતઃ પ્રભુઃ ॥ 13 ॥

**ઇતિ શ્રીગણેશપુરાણે ઉપાસનાખંડે શ્રીગણેશાષ્ટકમ્ ।**

✧˳·˖✶ ❋ ✶˖·˳✧

Free download PDF of all types of mantra, stotram,vandana,arati: chalisapdf.net